ब्रह्मणे माषभक्ताभावे एषद ध्यक्षतवलिर्नमः॥९॥ ॐ यो सावनन्तरूपेण ब्रह्माण्डं सचराचरम्॥ रामः
२५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वव्द्धारयेन्मूर्द्धिनतस्मै नित्यंनमोनमः ॥१०॥ ॐ सहस्त्रशीर्षा· ॐ अनंतायमाषभक्ताभावे· एष
दध्यक्षतवलिर्नमः॥१०॥ ॥ॐ मुगाव· क्रवाद्यष्टवसुभ्योर्माषभक्ताभावे·एषदध्यक्षतवलिर्नमः॥
॥१॥ ॐ यज्ञोदेवानाम्। धात्रादिद्वादशादित्येभ्यो· माषभक्ताभावे·एषदध्यक्षतवलिर्नमः॥२॥ यः ए
मावंतः। ॐ वीरभद्राद्येकादशरुद्रेभ्यो·माषभक्ताभावे· एषदध्यक्षतवलिर्नमः॥३॥ ॐ गौरीर्मिमा
शलिलानिसितक्षाति·। ॐ गौर्यादिषोडशमातृभ्यो· माषभक्ताभावे एषदध्यक्षतवलिर्नमः॥४॥
ॐ गणानान्त्वा·। ॐ गणपतये· माषभक्ताभावे· एषदध्यक्षतवलिर्नमः॥५॥ ॐ मरुतो यस्य। ॐ
आवहादिसप्तमरुत्·माषभक्ताभावेएषदध्यक्षतवलिर्नमः॥६॥ ॐ ब्रह्मजज्ञानम्· ॐ ब्रह्मणेमाष
भक्ताभावेएषदध्यक्षतवलिर्नमः॥७॥ ॐ इदंविष्णु· ॐ विष्णवेमाषभक्ताभावेएषदध्यक्षतवलिर्नमः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र·शां ॥८॥ ॐ मानस्तोके· ।ॐ रुद्रायमाषभक्ताभावे एषदध्यक्षतवलिर्नमः॥९॥ ॐ अग्निरस्मि· ।ॐ अर्का
२६ यमाषभक्ताभावे एषदध्यक्षतवलिर्नमः॥१०॥ ॐ वनस्पतेवीड्वंग· ।ॐ वनस्पतेमाषभक्ताभावे·
एषदध्यक्षतवलिर्नमः॥१॥ एवंफलादिपरिभक्षाणिसूर्यादिग्रहनक्षत्रदेवताभ्योनमः।
इतिदद्यात् ।ॐ वास्तोष्पते· वास्तुदेवाय· माषभक्ताभावे· एषदध्यक्षतवलिर्नमः॥१॥
ॐ क्षेत्रस्यपतिनावयं· ।ॐ क्षेत्रपालाय· माषभक्ताभावे· एषदध्यक्षतवलिर्नमः॥२॥
कुटकोपरिकृत्वा सरावं दक्षिणास हितं निधाय· क्षेत्रपालस्य अनुरागं धेन पूजां कुर्यात्
॥ध्यानम्·॥ भ्राजद्वज्रध टाधरं त्रिनयनं नीलांजनादिप्रभम्· दोर्दण्डात्तगदाकपालम् शा:
२६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हुताश्च गंधर्वस्वाहृतम्॥ घंटा घुर्घुरमेखला ध्वनि मिलद्धूंकार भीमं मुदा· वन्दे सहितस
र्पकुराडलधरं श्रीक्षेत्रपालं सदा॥१॥ॐ क्षौं क्षेत्रपालायनमः।ॐ नमो भगवते क्षेत्रपाल
यत्रय स्त्रिंशत्कोटि देवाधि निर्जिताय भार भासुर त्रिनेत्र स्वांग किंकिणी ज्वालामुखभैरव
रूपिणे तुरु२ मुरु२ लल २ खख २ फेंकार पूरित दिङ्मुखसमहावाहो ग्रह मखकर्मणि
अमुं सदीपं कशशान्त बलिंभक्षय २ अमुक यजमानस्यायुः कर्त्ताक्षेमकर्त्तातुष्टिकर्त्तापु
ष्टिकर्त्ता शांतिकर्त्तारः वरदोभव ।एवं बलियेननीयतेतत्र हुतोपं क्षिपेत्· बलिं चतुष्पथे
क्षिपेत्॥ ॥ततः वेद्युपरि हस्तमात्रं फलपुष्पशोभितं· वितानकं द्वहस्य तिदेवतं· सूर्यादि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र शां देवताभ्यो नमः॥ इति संकल्पयेत्॥ ॥ एवं पूजां निवर्त्य अग्नेर्दक्षिण· उपवेश्य उत्तराभिमु
३७ खो भूत्वा· कुशयवजलान्यादाय· ॐ अद्येत्यादि देशकालौ स्मृत्वा· ग्रहशांतिकर्मणि· इद
माज्यादि हवनीयं पूर्वमाघाराज्यभागं· प्रजापतीन्द्राग्निसोमदेवताभ्य· प्रधानभूतेभ्यः सू
र्य· सोम· बुध· वृहस्पति· शुक्र· शनैश्चर· राहु· केतूपग्रह·। ईश्वर· उमास्कंद· विष्णु· ब्र
ह्म· इन्द्र· यम· काल· चित्रगुप्ताख्याधिदेवता·। अग्नि· आप· भूमि· विष्णु· इन्द्र· इन्द्राणी·
सर्प२ प्रजापति· ब्रह्माख्य· प्रत्यधिदेवता·। विनायक· दुर्गा· वायु· आकाश· अश्वाख्य· लो
कपाल·। इन्द्र· अग्नि· यम· निर्ऋति· वरुण· वायु· सोम· ईशान ब्रह्मानन्ताख्य· दिक्पाल शाम:

३७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

·क्रवाष्टवसु· धात्रादिद्वादशादित्य· वीरभद्राद्येकादशरुद्र· गणपति· सहितगौर्यादि
षोडशमातृ· आवहादिसप्तमरुत्। ब्रह्मविष्णुरुद्रार्कवनस्पतिदेवेभ्यः उत्तरांगः ॐ
भूर्भुवः स्वः अग्निवरुणसवितृ· विष्णु· विश्वेदेवमरुत्स्वर्कप्रजापति· स्विष्टकृद्देवेभ्यो
मयाप्यक्तसर्वदेवतोद्देशेनयुगपद्द्रव्यत्यागं कुर्यात्· प्रत्याहुतिस्तागस्यकर्तुमशक्यत्वा
त्· होमस्य प्रणवादिस्वाहान्तस्तत्तद्देवत्यमंत्रैः· अधिदेवछंदोनुकीर्त्तनपूर्वकं· नवग्र
हा· अधिदेवता· प्रत्यधिदेवता· पंचलोकपाल· दशदिक्पाला· अष्टवसू· द्वादशादित्यैका
दशरुद्र· षोडशमातृ· सप्त मरुत्· ब्रह्म· विष्णुरुद्रार्कवनस्पतीनांप्रधानदेवतानां· प्र

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रं·शा· न्येकमष्टोत्तरशतं १०८ अष्टाविंशति २८ द्वादश १२ ऽ अष्टौ ८ वाहुतयः इत्येवंका
२८ र्यं। वस्वादिमस्त्रांमंत्रानुरोधेनसमुदितानामेकहोमप्रत्येकमंत्राभावात्। तत्रसमु
दितपक्षेकपंचासद्देवता·। अष्टोत्तरशताहुतीषुपंचसहस्राणिपंचशतान्यष्टौचाहु
तयः ५५०८ अष्टाविंशत्याहुतीषु· चतुर्दशशतान्यष्टाविंशति १४२८ चाहुतयः·द्वा
दशाहुतीषुषट्शतानिद्वादशचाहुतयः ६१२॥ अष्टाहुतीषु ·चतुःशतान्यष्टौचाहुत
यः ४०८॥ जापसूक्तानिजपेत्॥ गुरुःसर्वाध्यक्षस्तिष्ठेत्। ततःसमिद्धतमेग्निर्ऋमे
हुताशनेदक्षिणजानुंपातयित्वा। होता· आज्यपूर्णांस्रुवेणप्रथमंमनसा·प्रजाप ग्रामः २८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नयइति प्रजापतिऋषिस्त्रिष्टुप्छंद प्रजापतिर्देवतानवग्रहमखे आज्यहोमे विनियोगः
॥ ॐ प्रजापतये स्वाहा। इदं प्रजापतये। इति प्राजापत्यमाघारं जुहुयात्। स्रुवस्य हुतशे
षं च प्रोक्षणीपात्रे निदध्यात्। ॐ इन्द्रायेति प्रजापतिऋषिस्त्रिष्टुप्छंद इन्द्रो देवतान
वग्रहमखे आज्यहोमे विनियोगः। ॐ इन्द्राय स्वाहा। इदमिन्द्राय। इति द्वितीयमाघा
रं जुहुयात्॥ अग्नेर्दक्षिणाभागे स्रुवस्य हुतशेषं च प्रोक्षणीपात्रे निदध्यात्। ॐ अग्नये
इति प्रजापतिऋषिस्त्रिष्टुप्छंदोऽग्निर्देवतानवग्रहमखे आज्यहोमे विनियोगः। ॐ अ
ग्नये स्वाहा। इदमग्नये। इत्याग्नेये आज्यभागं जुहुयात्॥ ॐ सोमायेति प्रजापतिऋषिस्त्रिष्टु

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रं·शां पंछंदः सोमोदेवता· नवग्रहमखेआज्यहोमे विनियोगः॥ ॐ सोमायस्वाहा॥ इदं सोमाय। इदंसोमा

२९ य। इति हुतीयमाज्यभागं अग्नेरुत्तरभागेजुहुयात्॥ ॥अथप्रधानदेवताहोमः॥ तत्रसूर्य

स्य॥ ॐ आकृष्णेनेति हिरण्यस्तूपऋषि स्त्रिष्टुपंछंदः सविता देवता आदित्य देवता प्रीतयेक

पिलाग्नौ आज्यहोमेऽर्कसमिद्धोमेच विनियोगः॥ ॐ आकृष्णेने ॐ सूर्यायस्वाहा· इदंसू

र्याय॥ १॥ ॐ इमंदेवे ति· वरुणऋषिसोमोदेवता यजुः सोमप्रीतये पिंगलाग्नौ· आज्यहो

मे पलाससमिद्धोमेच विनियोगः॥ ॐ इमन्देवा· इति· सोमायस्वाहा·। इदंसोमाय॥ २॥ रामः

ॐ अग्निर्मूर्द्धेति विरूपाक्षऋषि र्गायत्रीछंदोऽङ्गारकोदेवताकुजप्रीतये धूम्रकेत्वग्नौ २९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आज्यहोमेखदिरसमिद्धोमे च विनियोगः॥ ॐ अग्निर्मूर्द्धा ॐ कुजाय स्वाहा। इदं कुजाय॥
३॥ ॐ उद्बुध्यस्वेतिपरमेष्ठिऋषिर्बुधोदेवतात्रिष्टुप्छन्दो बुधप्रीतयेजाठराग्नौ आज्यहो
मेऽपामार्गसमिद्धोमे च विनियोगः॥ ॐ उद्बुध्यस्व॰ ॐ बुधाय स्वाहा। इदं बुधाय॥४॥
ॐ बृहस्पतेअतीतिगृत्समदऋर्षिर्बृहस्पतिर्देवतात्रिष्टुप्छन्दो बृहस्पतिप्रीतये शिखाना
ग्नौ आज्यहोमेऽश्वत्थसमिद्धोमे च विनियोगः। ॐ बृहस्पतेऽअति॰ ॐ बृहस्पतये स्वा
हा। इदं बृहस्पतये॥५॥ ॐ अन्नात्परिस्रुतेतिप्रजापत्यश्विसरस्वतीन्द्रा ऋषयः शुक्रो
देवता॰ जगती छन्दः शुक्रप्रीतये हाटकाग्नौ आज्यहोमे उदुम्बरसमिद्धोमे च॰ विनियोगः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र॰ शां॰ ॐ अन्नात्परिस्रुत॰ ॐ शुक्राय स्वाहा॰ इदं शुक्राय॥ ६॥ ॐ शन्नोदेवीरिति दध्यङ्गाथर्वण ऋषिः
३० शनैश्चरदेवता गायत्री छंद शनैश्चरप्रीतये महानेजाग्रोन्याज्यहोमे॰ समि॰ समिद्धोमे
च विनियोगः॥ ॐ शन्नोदेवी॰ ॐ शनैश्चराय स्वाहा॰ । इदं शनैश्चराय॥ ७॥ ॐ कयानश्चि
त्रेति वामदेव ऋषि॰ राहुदेवता॰ गायत्रीछंदो॰ राहुप्रीतये हुताशनाग्रो आज्यहोमे दु
र्वासमिद्धोमे च विनियोगः॥ ॐ कयानश्चित्र॰ ॐ राहवे स्वाहा॥ इदं राहवे॥ ८॥ ॐ केतुंकृ
ण्वन्निति मधुच्छंद ऋषि॰ केतुदेवता॰ गायत्रीछंदः केतुप्रीतये रोहिताग्रो आज्यहोमे रामः
३०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुशास मिद्धोमे चवि नियोगः॥ ॐ केतुं कृण्वन्‌· ॐ केतवे स्वाहा। इदं केतवे॥९॥ ॥
अथाधिदेवतानां॥ तत्रेश्वरस्य॥ ॐ त्र्यम्बकमिति· वशिष्ठ ऋषिरुद्रो देवता· अनुष्टुप्छं
दः त्र्यम्बक प्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ त्र्यम्बकं यजामहे· ॐ त्र्यम्ब
काय स्वाहा· इदं त्र्यंबकाय॥१॥ अत्र प्रणीतोदकस्पर्शः॥ ॐ श्रीश्चते ति· उत्तरनारायण
ऋषि त्रिष्टुप्छंदः· उमा देवता· उमा प्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ श्रीश्च
ते· ॐ उमायै स्वाहा· इदमुमायै॥२॥ ॐ यदक्रन्देति भार्गवो जमदग्निर्दीर्घतमा ऋषय· स्कं
दो देवता· त्रिष्टुप्छंदः स्कंद प्रीतये आज्यहोमे· चरुहोमे च विनियोगः॥ ॐ यदक्रन्द· ॐ स्कं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र० शां० दायस्वाहा। इदं स्कंदाय॥३॥ ॐ विष्णोरराटमिति। उतथ्य ऋषिर्विष्णुर्देवता यजुश्छंदो विष्णु
३१ प्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ विष्णोरराटम्॥ ॐ विष्णवे स्वाहा। इदं विष्णवे॥
॥४॥ ॐ आब्रह्मन्निति प्रजापतिऋषिर्ब्रह्मा देवता। यजुर्ब्रह्मा प्रीतये। आज्यहोमे। चरुहो
मे च विनियोगः॥ ॐ आब्रह्मन्। ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे॥५॥ ॐ सजोषा इन्द्रेति वि
श्वामित्र ऋषिरिन्द्रो देवता। त्रिष्टुप्छंदः इन्द्रप्रीतये आज्यहोमे चरुहोमे च। विनियोगः॥
ॐ सजोषा इन्द्र। ॐ इन्द्राय स्वाहा। इदमिन्द्राय॥६॥ ॐ यमाय त्वेति दध्यंगाथर्वण ऋषि
यजु। यमो देवता। यमप्रीतये। आज्यहोमे चरुहोमे च विनियोगः॥ ॐ यमाय त्वा। ॐ यमा रामः ३१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्वाहा॰ इदंयमाय॥७॥ अत्रप्रणीतोदकस्पर्शः॥ ॐकार्षिरसीतिदध्यंगाथर्वणऋषि
:कालोदेवता॰ अनुष्टुप्छंदः कालप्रीतयेआज्यहोमे॰ चरुहोमेचविनियोगः॥ ॐकार्षिर
सि।ॐकालायस्वाहा॰ इदंकालाय।अत्रप्रणीतोदकस्पर्शः॥८॥ ॐ चित्रवसोरितिऋ
षयःयजुश्चित्रगुप्तोदेवता॰ जगतीछंदश्चित्रगुप्तप्रीतयेआज्यहोमेचरुहोमेचविनि
योगः॥ ॐचित्रावसो॰ ॐचित्रगुप्तायस्वाहा॰। इदंचित्रगुप्ताय॰॥९॥ अत्रप्रणीतोदक
स्पर्शः॥ ॥अथप्रत्यधिदेवतानाम्॥ अग्निंदूतमितिविरूपाक्षऋषिरग्निर्देवतागायत्री
छंदोऽग्निप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐ अग्निंदूतम्॥ ॐ अग्नयेस्वाहा॰।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रं शां इदमग्नये ॥ १ ॥ ॐ अप्स्वग्नेरित्ति बृहस्पतिऋषिरापो देवता पुरउष्णिक् छंदो ऽपांप्रीतये आज्यहोमे
३२ च विनियोगः ॥ ॐ अप्स्वग्ने ॐ अपायस्वाहा इदमद्भ्यः ॥ २ ॥ ॐ स्योना पृथिवीति मेधातिथिऋषि
पृथिवी देवता गायत्री छंदः पृथिवीप्रीतये आज्यहोमे च रुहोमे च विनि ॥ ॐ स्योना पृथिवी पृ
थिव्यै स्वाहा इदं पृथिव्यै ॥ ३ ॥ ॐ इदं विष्णुरिति मेधातिथिऋषिर्विष्णुर्देवता गायत्री छंदो वि
ष्णुप्रीतये आज्यहोमे च रुहोमे च विनियोगः ॥ ॐ इदं विष्णु ॐ विष्णवे स्वाहा । इदं विष्णवे ॥ ४ ॥
ॐ त्रातारमिन्द्रमिति गार्ग्य ऋषिरिन्द्रो देवता त्रिष्टुप् छंदः इन्द्रप्रीतये आज्यहोमे च रुहोमे च
विनियोगः ॥ ॐ त्रातारमिन्द्रम् ॐ इन्द्राय स्वाहा । इदमिन्द्राय ॥ ५ ॥ अदित्यै रास्नेति दध्यं गाय रामः ३२

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

र्वणा ऋषिरिन्द्राणिदेवता· यजुस्त्रिष्टुप्छंदः शचीप्रीतये आज्यहोमे चरुहोमे विनियोगः॥ॐ
अदित्यैरास्ना· ॐ शच्यै स्वाहा· इदं शच्यै॥६॥ ॐ प्रजापतेनेति वरुण ऋषिः प्रजापतिर्देवता
त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ॐ प्रजापतेनमः।
ॐ प्रजापतये स्वाहा। इदं प्रजापतये॥७॥ नमोस्तु सर्पेभ्यः इति देवा ऋषयः सर्पा देवता अनुष्टु
प्छंदः सर्पप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ॐ नमोस्तु सर्पेभ्यः।ॐ सर्पाय स्वाहा·। इदं सर्पे
भ्यः॥८॥ ॐ ब्रह्मजज्ञानेमिति प्रजापतिऋषिर्ब्रह्मा देवता· त्रिष्टुप्छन्दो· ब्रह्मप्रीतये आज्यहोमे
चरुहोमे च विनियोगः॥ॐ ब्रह्मजज्ञानम्·। ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे·॥९॥ ॥अथ विना

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र॰ शां यकादिपंचलोकपालानाम्॥ ॥ॐगणानान्त्वेति प्रजापतिऋषिर्गणपतिर्देवतायजुर्विनायक
२२ प्रीतयेआज्यहोमेचरुहोमेच विनियोगः॥ॐ गणानान्त्वा॰ ॐगणपतयेस्वाहा॰ इदंगणपतये॰
॥१॥ ॐ अम्बेअम्बिकेति॰ प्रजापतिऋषिर्दुर्गादेवताऽनुष्टुप्छंदो दुर्गाप्रीतये॰ आज्यहोमेचरु
होमेच विनियोगः।ॐ अम्बेअम्बिके॰ ॐदुर्गायैस्वाहा॰ इदंदुर्गायै॥२॥ ॐवातोवेतिगंधर्वा
ऋषयो॰ वातोदेवता॰ उष्णिकछंदोवायुप्रीतयेआज्यहोमे॰ चरुहोमेचविनियोगः।ॐवा
तोवा॰ ॐवायवेस्वाहा॰।इदंवायवे॥३॥ ॐ उर्द्धाऽअस्येतिप्रजापतिऋषिराकाशोदेवता
उष्णिकछंद आकाशप्रीतयेआज्यहोमेचरुहोमेचविनियोगः॥ ॐउर्द्धाऽअस्य॰ ॐआकायस्वा रामः
२२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हा · इदमाकाशाय॥४॥ ॐ अश्विनो भैषज्येति अश्विकर्ष्बिरश्विनो देवते यजुरश्विनि प्रीतये आज्य
होमे चरुहोमेच · विनियोगः॥ ॐ अश्विनो भैषज्येन · ॐ अश्विभ्यांस्वाहा · इदमश्विभ्यां॥ ५॥॥
॥ ॥ अथ दिक्पालानाम्॥ ॥ तत्रेन्द्रस्य ॥ ॐ त्रातारमिन्द्रमिति गार्ग्य ऋषिरिन्द्रो देवता · त्रि
ष्टुप्छन्दः इन्द्रप्रीतये आज्यहोमे · चरुहोमेच विनियोगः॥ ॐ त्रातारमिन्द्रम् · ॐ इन्द्रायस्वाहा
· इदमिन्द्राय:॥ १॥ अग्निन्दूतमिति विरुपाक्ष ऋषिरग्निर्देवता गायत्री छन्दो ऽग्निप्रीतये
आज्यहोमे · चरुहोमेच विनियोगः॥ ॐ अग्निन्दूतम्। ॐ अग्नयेस्वाहा। इदमग्नये॥ २॥ ॐ
असियम इति भार्गवजमदग्निर्दीर्घतम ऋषयो यमो देवता · त्रिष्टुप्छन्दो यमप्रीतये · आ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0: Digitized by eGangotri and MIDF- Delhi

ग्र॰ शां॰ ज्यहोमे चरुहोमे च विनियोगः॥ ॐ असियम॰ ॐ यमायस्वाहा। इदंयमाय॰। अत्रप्रणीतोद
३४ कस्पर्शः॥३॥ असुन्वन्त॰ ॐ निर्ऋतये स्वाहा॰ इदंनिर्ऋतये॰। अत्रप्रणीतोदकस्पर्शः॥४॥
ॐ तत्वायामीति॰ शुनःशेफऋषिर्वरुणोदेवता॰ गायत्रीछंदो॰ वरुणप्रीतये॰ आज्यहो
मे॰ चरुहोमेच विनियोगः॥ ॐ तत्वायामि॰ ॐ वरुणायस्वाहा॰ इदंवरुणाय॥५॥ ॥
अत्रप्रणीतोदकस्पर्शः॥ ॐ वातोवेतिगंधर्वाऋषयोवायोर्देवता॰ उष्णिकछंदोवायुप्री
तये आज्यहोमे चरुहोमेच विनियोगः॥ ॐ वातोवा॰ ॐ वायवेस्वाहा। इदंवायवे॥६॥
अत्रोदकस्पर्शः॥ ॐ वयꣳसोमेतिबंधुऋषिःसोमोदेवता॰ गायत्रीछन्दः सोमप्री ग्र॰शां॰ ३४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ वय ऽ सोम· ॐ सोमायस्वा· इदं सोमाय॥ ७॥ तमीशा
नमिति गोतम ऋषिरीशानो देवता जगती छन्दः ईशान प्रीतये आज्य होमे चरुहोमे च· विनि
योगः॥ ॐ तमीशानं ॐ ईशानायस्वाहा। इदमीशानाय॥ इदमीशानाय॥ अत्रप्रणीतोदकस्प
र्शः॥ ८॥ ॐ नमोस्तु सर्पेभ्य इति देवा ऋषयोः नंतो देवता ऽ नुष्टुप्छंदो ऽ नंतप्रीतये आज्यहोमेच
रुहोमे च विनियोगः॥ नमोस्तु· सर्पेभ्यः ॐ अनंतायस्वाहा· इदमनन्ताय॥ ९॥ ॐ ब्रह्मजज्ञानमि
ति प्रजापति ऋषिर्ब्रह्मा देवता त्रिष्टुप्छंदो ब्रह्मप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ब्रह्म
जज्ञानम्॥ ॐ ब्रह्मणेस्वाहा। इदं ब्रह्मणे॥ १०॥ अथ वस्वादीनाम्॥ ॐ सुगावइति देवा ऋषयो व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र॰शा ऋषोदेवता॰त्रिष्टुप्छंदो वसुप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ सुगाव॰ ॐ वसुभ्यः स्वाहा॰ इ
३५ दं वसुभ्यः॥१॥ ॐ यज्ञो देवानामिति॰ कुत्सऋषिरादित्यो देवता त्रिष्टुप्छंदः आदित्यप्रीतये आज्यहो
मे चरुहोमे च विनियोगः॥ ॐ यज्ञो देवानाम्। ॐ आदित्येभ्यः स्वाहा। इदमादित्येभ्यः॥२॥ ॐ यऽएता
वन्तइतिपरमेष्ठीऋषिरुद्रो देवता अनुष्टुप्छंदो रुद्रप्रीतये आज्यहोमे॰ चरुहोमे च विनियोगः॥ यऽ
एतावन्त॰। ॐ रुद्रेभ्यः स्वाहा॰। इदं रुद्रेभ्यः॥३॥ अग्न्युत्तरतो दकस्पर्शः॥ ॐ गौरीर्मिमाय सलिलानि त॰ त
क्ष ति॥ ॐ गौर्य्यादिषोडशमातृभ्यो स्वाहा॰ ॐ गणानान्त्वा॰ ॐ गणपतये स्वाहा॥ ॐ मरुतो यस्ये ति गौत
मऋषिर्मरुतो देवता गायत्री छंदो मरुतां प्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ मरुतो यस्य॰ मरु राम:

३५

CC-0. Digitized by eGangotri and MIDF- Delhi

नेभ्यः स्वाहा। इदमग्नरुद्रेभ्यः॥४॥ ॐ आब्रह्मन्निति प्रजापतिऋषिर्ब्रह्मा देवता। यजुर्ब्रह्मप्रीतये आज्यहोमे
चरुहोमे च विनियोगः॥ ॐ आब्रह्मन्। ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे॥५॥ ॐ इदं विष्णुरिति मेधातिथि
ऋषिर्विष्णुर्देवता गायत्री छंदो विष्णुप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ इदं विष्णु। ॐ विष्ण
वे स्वाहा। इदं विष्णवे॥६॥ ॐ मानस्तोके तिकुत्सऋषिरुद्रो देवता गायत्री छंदो रुद्रप्रीतये आज्यहोमे
चरुहोमे च विनियोगः॥ ॐ मानस्तोके। ॐ रुद्राय स्वाहा। इदं रुद्राय॥७॥ अत्र प्रणीतोदकस्पर्शः॥ ॐ
चित्रं देवानामिति कुत्सऋषिः सूर्यो देवता। अर्कप्रीतये आज्यहोमे चरुहोमे च विनियोगः॥ ॐ चित्रं
देवानाम्। अर्काय स्वाहा। इदमर्काय॥८॥ वनस्पते वीड्वंगेति प्रजापतिऋषिर्वनस्पतिर्देवता। यजुर्व

Jagannath Bhattarai Collection. Nagarjuṅ-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र॰ शा॰ नस्पतिप्रीतये आज्यहोमे॰ चरुहोमे च विनियोगः॥ ॐ वनस्पते॰ ॐ वनस्पतये स्वाहा॰। इदं वनस्प
३६ ते॥ ९॥ अत्र प्रणीतोदकस्पर्शः॥ ॥ इति प्रधानदेवताहोमः॥ ॥ अथ प्रधानदेव्यानि जपसूक्ता
नि॥ ॥ तत्र सूर्यस्य॥ ॐ विभ्राडिति सप्तदशर्चस्यानुवाकस्य॰ आ॰ द्याया॰ विभ्राड नंतरा रात्रि सूक्तं
प्रस्कण्व ऋषिः पंचम्या आवत्सरकस्य पऋषिः षष्ठ्या वेनक ऋषिः सप्तम्याः कुत्स ऋषिरष्टम्या अग
स्त्य ऋषिर्नवम्याः सुनकस्सुकक्ष ऋषिर्दशम्याः प्रस्कण्व ऋषिरथ द्वयोर्जमदग्निऋषिः पंचदशयतृ
मेधा ऋषिः षोडश्याः कुत्स ऋषिस्त्यायाहिरण्यस्तुप आंगिरस ऋषिः॰ पंचम्या विश्वे देवा देवताः ष
ष्ठ्याः सोमो देवता अन्यासां सूर्यो देवता॰ आद्या पंचमी जगती छन्द द्वितीयादितिस्त्रो नवमी॰ दशच रामः ३६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गायत्र्यष्टुंछंदांसि त्रयोदशी पंचदशेपोपस्थाद्बृहत्यो छन्दसी चतुर्दशी सप्तमो हृतीद छन्दः शेषाःस
प्तत्रिष्टुप्छंदांसि सूर्यप्रीतये जपे विनियोगः ॥ विभ्राड्बृहदित्यादि १२ ॥ १ ॥ ॐ आप्यायस्व इति व
चनस्य राहूगणो गोतम ऋषिः सोमो देवता त्रिष्टुप्छंदः सोम। प्रीतये जपे वि नियोगः ॥ ॐ आप्यायस्व ४ रित्या
दि ॥ २ ॥ ॐ अग्निर्मूर्द्धेति विरूपाक्ष ऋषिरग्निर्देवता· गायत्रीछंदो भौमदेवताप्रीतये जपे विनियोगः
॥ अग्निर्मूर्द्धा ॥ ३ ॥ ॐ उद्बुध्यस्वेति परमेष्ठी ऋषिरग्निर्देवता त्रिष्टुप्छंदो बुधप्रीतये जपे विनियोगः
॥ ॐ उद्बुध्यस्वः ॥ ४ ॥ ॐ बृहस्पते अतीति गृत्समद ऋषिर्ब्रह्मा देवता त्रिष्टुप्छंदो बृहस्पतीप्रीतये
जपे विनियोगः ॥ बृहस्पते ऽअति ॥ ५ ॥ अन्नात्परिस्रुत इति प्रजापत्यश्विसरस्वतीन्द्रा ऋ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

य शां षय·इन्द्रोदेवता·जगतीछन्दस्सुकप्रीतयेजपेविनियोगः॥ॐअन्नात्परिस्रुतः॥६॥शन्नोदेवीरि
३७ तिदध्यंगाथर्वणऋषिरापोदेवता·गायत्रीछंदः शनैश्चरप्रीतयेजपेविनियोगः॥ॐशन्नोदेवी॥७॥
ॐकयानश्चित्रेतिवामदेवऋषिरिन्द्रोदेवतागायत्रीछन्दोराहुप्रीतयेजपेविनियोगः॥
ॐकयानः॥८॥ॐकेतुंकृण्वन्नितिमधुच्छंदऋषिरग्निर्देवतागायत्रीछंदः केतुप्रीतयेज
पेविनियोगः॥ॐकेतुंकृण्वन्॥९॥ ॥अथाधिदेवतानाम्॥ ॥तत्रेश्वरस्य॥ॐनमस्ते
इतिषट्पष्टिमंत्रात्मनोरुद्राध्यायस्यपरमेष्ठीऋषि· आद्यानांषोडशानामेकरुद्रोदेवता
·आद्यागायत्रीछंदस्तिस्रोनुष्टुभश्छंदांसिद्वेजगत्यौछन्दसी·नमोहिरण्यबाहवइत्यंतस्त्रिष्टुब्· रामः ३७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋषिः द्रापे अंधस इत्यनुपरिष्टाद्बृहस्पतिश्छंदः इमारुद्रायेति जगतीछंदो यानेरुद्रेत्यनुष्टुप्छं
दस्तनो द्वे त्रिष्टुभौ छन्दसी विकिरिद्रेत्याद्याद्वादशानुष्टुभश्छन्दांसि शेषाणि त्रीणि यजूंषि
रुद्रप्रीतये जपे विनियोगः॥ ॐ नमस्ते रुद्रः ६६॥ हवामहे त्वं तोः षोडशो वयासु मिति
रूपनारायणप्रीतये। ॐ श्रीश्चते सुत्तर नारायण ऋषिर्नारायणो देवता त्रिष्टुप्छंदः उ
मा प्रीतये जपे विनियोगः॥ ॐ श्रीश्चते॥ ॐ यदक्रंदइति भार्गवजमदग्निर्दीर्घतमस ऋष
यः स्कंदो देवता त्रिष्टुप्छंदः स्कंदप्रीतये जपे विनियोः॥ ॐ यदक्रन्दः। ॐ सहस्रशीर्षेति षोडशा
नां नारायण ऋषिः पुरुषो देवता ऽनुष्टुप्छंद अन्त्यास्त्रिष्टुप्छंदांसि विष्णुप्रीतये जपे विनियोग

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र०शां ॥ ॐ सहस्रशीर्षापुरुषः॥१६॥ ॐ आब्रह्मन्निति प्रजापतिर्ऋषिर्ब्रह्मादेवतायजुर्ब्रह्मप्रीतये
३८ जपे विनियोगः॥ ॐ आब्रह्मन्॥१॥ ॐ आशुः शिशानः इति द्वादशानां अप्रतिरथ ऋषिरिन्द्रो देवता
त्रिष्टुप्छंदः इन्द्रप्रीतये जपे विनियोगः॥ ॐ आशुः शिशानः ॥१२॥ ॐ यमाय त्वेति दध्यंगाऽथर्व
णऋषिर्यमो देवता यजुर्यमप्रीतये जपे विनियोगः॥ ॐ यमाय त्वा॥१॥ ॐ कार्षिरसि दध्यंगा
थर्वण ऋषिकालो देवताऽनुष्टुप्छंद कालप्रीतये जपे विनियोगः॥ कार्षिरसि॥१॥ चित्राव
सो रिति ऋषय ऋषयोऽग्निर्देवता जगतीछंदः शिवसुप्रप्रीतये जपे विनियोगः॥ ॐ चित्राव
सोः॥१॥ ॥ अथ ग्रहाधिदेवतानाम्॥ ॥ ॐ अस्याजरासइतिसप्त दशानां आद्यायाः वत्सर ग्रहाः ३८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋषिरिन्द्रवायुर्देवतेत्रिष्टुप्छंदोद्वितीयायाविरूपाक्षऋषिरिन्द्रवायूदेवतेगायत्रीछंदस्तृ
तीयायागोतमऋषिमित्रावरुणौदेवतेगायत्रीछंदश्चतुर्थ्याविरूपऋषिरिन्द्रावरुणौदेवते
गायत्रीछंदः पंचम्यांकुत्सऋषिःशुक्रोदेवतात्रिष्टुप्छंदः षष्ठ्यावामदेवऋषिरग्निर्देवताजगती
छंदः सप्तम्याविश्वामित्रऋषिरिन्द्रोदेवतात्रिष्टुप्छंदः अष्टम्या·भारद्वाजऋषिरग्निर्देवतात्रि
ष्टुप्छंदो· नवम्याभरद्वाजऋषिर्विश्वेदेवादेवतात्रिष्टुप्छंदो· दशम्यामेधातिथिऋषिरग्निर्देव
तागायत्रीछंदः एकादश्यापराशरऋषिर्मरुतोदेवताः त्रिष्टुप्छंदा· द्वादश्याअत्रिडहितावि
श्वव्यचाऋषिर्मरुतोदेवतात्रिष्टुप्छंदः त्रयोदश्याभारद्वाजऋषिरग्निर्देवतात्रिष्टुप्छंदश्चतुर्द

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र·शा ष्णापं दश्चपोवशिष्ठऋषिरादित्योदेवता वृहती छंदः षोडश्चपावामदेवऋषिरग्निर्देवता त्रिष्टु
३९ प्छंदः सप्तदश्चपातुः सोधातानकऋषिसविता देवता त्रिष्टुप्छंदोऽग्निप्रीतयेजपेवि
नियोगः॥अग्स्याजरासः॥४॥ॐ आपोहिष्ठेतितिसृणांसिन्धुद्वीपऋषिरापोदेवतागा
यत्री छंदोऽपांप्रीतयेजपेविनियोगः॥ॐ आपोहिष्ठा ३॥ॐ स्योनापृथिवीतिदध्यं
गाथर्वणऋषिपृथिवीदेवतागायत्री छंदः पृथिवीप्रीतयेजपेविनियोगः॥ॐ स्योना
पृथिवी॥१॥ॐ सहस्रशीर्षेतिनारायणऋषिः पुरुषोदेवता त्रिष्टुप्छंदः अन्त्यानुष्टु
प्छंदो विष्णुप्रीतयेजपेविनियोगः॥ॐ सहस्रशीर्षापुरुषः १६॥ॐ आपः शिशानः रामः ३९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति द्वादशर्चं ऐन्द्रः प्राग्वत् ॥१२॥ ॐ अदित्यै रास्नेति दध्यंगाथर्वणऋषिरिन्द्राणि देव
ता यजुरिन्द्राणी प्रीतये जपे विनियोगः॥ अदित्यै रास्ना ॥१॥ ॐ हिरण्यगर्भ इति चतुर्णां
हिरण्यगर्भऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रजापतिप्रीतये जपे विनियोगः॥ ॐ हिरण्यगर्भ
सम् ॥४॥ ॐ नमोस्तु सर्पेभ्यः इति त्र्यर्चस्य देवा ऋषयः सर्प्पा देवता ऽनुष्टुप्छन्दः सर्प्पप्रीतये
जपे विनियोगः। ॐ नमोस्तु सर्पेभ्यः ॥३॥ ॐ ब्रह्मजज्ञानमिति प्रजापतिऋषिरादित्यो देवता
त्रिष्टुप्छन्दो ब्रह्मप्रीतये जपे विनियोगः॥ ॐ ब्रह्मजज्ञानम् ॥१॥ ॥ अथ विनायकादिपं
चानाम् ॥ ॐ गणानान्त्वेति प्रजापतिऋषिर्गणपतिर्देवता यजुर्विनायकप्रीतये जपे वि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नियोगः॥ ॐ गणानां त्वा॥१॥ ॐ अम्बे अम्बिके ति प्रजापति ऋषिर्दुर्गा देवता ऽनुष्टुप् छंदो दुर्गा
प्रीतये जपे विनियोगः। ॐ अम्बे अम्बिके ॥१॥ ॐ नियुत्वान्वाय विति षण्णां आद्यायां गृत्समद ऋ
ऋषिः द्वितीयाः पुरुषमीढाजमीढौ ऋषि तिसृणां प्रजापति ऋषिः षष्ठ्या वस्य आंगिरस
ऋषिर्वायुर्देवता द्वितीयायाः अनुष्टुप् छंदः पञ्चमी त्रिष्टुप् छन्दः शेषाणां गायत्र्या श्छंदांसि
वायुप्रीतये जपे विनियोगः॥ ॐ नियुत्वान्वायः॥६॥ ऊर्द्धा अस्येति द्वादशानां प्रजापति
ऋषिरग्निर्देवता उष्णिक् छंदः आकाश प्रीतये जपे विनियोगः॥ ॐ ऊर्द्धा अस्य॥१२॥ ॐ
पावां कशे ति मेधा तिथि ऋषिरश्विनो देवते गायत्री छंदो अश्विनी प्रीतये जपे विनियोगः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ यावांकशा ॥१॥ ॥ अथदिक्पाला नाम् ॥ ॥ॐ आशुः शिशानो द्वादशार्चमैन्द्रं प्राग्वत् ॥
१२॥ ॐ अस्माजरासइतिसप्तदशार्चमाग्नेयम्प्राग्वत् ॥७॥ ॐ यमायत्वेतिदध्यंगाथर्वण ऋषि
र्यमोदेवता· यजुर्यमप्रीतयेजपेविनियोगः ॥ॐ यमायत्वा ॥१॥ ॐ असुन्वंतमयजमानंइति
अर्द्धस्यप्रजापतिऋषिरग्निर्देवतात्रिष्टुप्छंदो निर्ऋतिप्रीतयेजपेविनियोगः ॥ॐ असुन्वंतम
यजमानं ॥३॥ ॐ इमंमेवरुणेतिद्वयोःशुनःशेपऋषिवरुणोदेवतागायत्री [illegible] त्रिष्टुभौछन्दसीवरु
णप्रीतयेजपेविनियोगः ॥ इमम्मेवरुण २॥ नियुत्वान्वायवेतिषट्वायुं· प्राग्वत् ॥ॐ आशाठ
युन्तु इति सोम्यचतुष्टयंप्राग्वत् ॥४॥ ॐ रुद्रायषट्षष्ठीमंत्र· ईशानेप्राग्वत् ॥६६॥ नमोस्तुस

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रं॰श्रा॰ पैप्परिति अर्च्चंप्राग्वत्॥३॥ॐ ब्रह्मजज्ञानमिति प्रजापतिऋषिरादित्योदेवतात्रिष्टुप्छंदो ब्रह्माप्रीत
४१ येजपेविनियोगः॥ ॐ ब्रह्मजज्ञानम्॥ ॥अथवस्वादीनाम्॥ॐ सुगावइति देवाऋषयोवसवो
देवतात्रिष्टुप्छंदोवसुप्रीतयेजपेविनियोगः॥ॐ सुगावः॥१॥ॐ इमागिरेति गृत्समदऋषिरादि
त्योदेवतात्रिष्टुप्छंदो आदित्यप्रीतयेजपेविनियोगः॥ॐ इमागिरः॥१॥रुद्राध्यायोरौद्रं प्राग्वत्॥
॥६६॥ॐ शुक्रज्योतिश्चेति षण्णांसप्तर्षयोमरुतोदेवता आचतुर्थीवोस्त्रिकंचमीजगतीशेषागाय
त्रीछंदांसि मरुतांप्रीतयेजपेविनियोगः॥शुक्रज्योतिश्च॥६॥ॐ आब्रह्मन्निति प्रजापतिऋषिर्ब्र रामः
ह्मादेवतायजुर्ब्रह्माप्रीतयेजपेविनियोगः॥ॐ आब्रह्मम्॥१॥ॐ सहस्रशीर्षेति वैष्णवंप्राग्वत्॥ ४१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥१६॥रुद्राध्यायोरौद्रं प्राग्वत्॥६६॥ॐ विभ्राड्बृहदितिमंत्रद्वयार्चमार्कं प्राग्वत्॥७॥वनस्पतेवी
ड्वङ्ग इति प्रजापतिऋषिर्वनस्पतिर्देवता· त्रिष्टुप्छंदो वनस्पतिप्रीतये जपे विनियोगः॥ वन
स्पतेवीड्वङ्ग॥१॥ ॥ततोत्तरांगव्याहृतीहोमादिबर्हिहोमान्तं पूर्णाइति प्राग्भाविकर्म कुर्यात्॥
ॐ भूर्भुवःस्वरिति व्याहृतीनां प्रजापतिऋषिरग्निर्वायुसूर्यो देवता गायत्र्युष्णिगनुष्टुभश्छंदां
सि होमे विनियोगः॥ ॐ भूःस्वाहाः।इदमग्नये।ॐ भुवःस्वाहा।इदं वायवे।ॐ स्वःस्वाहा।इदं सूर्याय·
॥ ॥त्वन्नोअग्नइतिवामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छंदो होमे विनियोगः॥त्वन्नो अग्नेव
रुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांꣳसि प्रमुमु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्धस्मत्स्वाहा। इदमग्नीवरुणाभ्याम्॥१॥ ॐ स त्वन्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दो अग्निवरुणौ देवते प्राय
श्चित्त होमे विनियोगः॥ ॐ स त्वन्नोऽअग्ने वमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ॥ अवयक्ष्वनो वरु
णं रराणो वीहि मृडीकं सुहवोनऽएधि स्वाहा॥ इदमग्नीवरुणाभ्यां॥ २॥ अयाश्चाग्न इति वामदेव ऋ
षिरग्निर्देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्त होमे विनियोगः॥ अयाश्चाग्नेस्यन भिशस्तिपाश्च सत्वमित्वमया
असि॥ अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा॥ इदमग्नये॥ ३॥ येते शतमिति वामदेव ऋषि
र्वरुणः सविता विष्णुर्विश्वे मरुतः स्वर्का देवता त्रिष्टुप्छन्दः सर्वप्रायश्चित्त होमे विनियोगः॥ ॐ येते शतं
वरुणा ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेदेवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥४॥ ॐ उदुत्तममिति शुनःशेप ऋषिर्व
रुणो देवता त्रिष्टुप्छन्दो विष्णुक्रमेक्षः पाशान्मोचने विनियोगः ॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं वि
मध्यमं श्रथाय । अथा वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा । इदं वरुणाय ॥५॥ ॥
ॐ प्रजापतये स्वाहा । इदं प्रजापतये इति मनसा ॥ ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते ॥ ततः
संस्रवप्राशनम् । ततो ब्राह्मणे पूर्णपात्रदानं ॥ तत्र वाक्यं । ॐ अद्येत्यादि० कृतैतत्तत्व ग्रहयज्ञांतिहोमकर्म
णि कृताकृत विक्षणरूप ब्रह्मकर्म प्रतिष्ठार्थं पूर्णात्पूर्णं पौर्णपात्रं प्रजापतिदैवतं ब्रह्मणे तुभ्यमहं सं
प्रददे । इति ब्राह्मणे पूर्णपात्रं दद्यात् । ॐ स्वस्तीति प्रतिवचनम् ॥ ॥ ततः सुमित्रिया न आप ओषधयः
संत्विति पवित्र प्रणीताजलेन शिरस्यभिषिंचेत् ॥ ॐ सुमित्रिया न आप ओषधयः संतु योऽस्मान्द्वेष्टि यं च वयं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विष्म· इत्यैशान्यांप्रणिताजलंन्युब्जीकुर्यात्॥ ततस्तरणक्रमेणैव वर्हिहस्तथाप्याज्येनाभिघा
र्य· ॐ देवागातुविदः इतिहस्तेन वर्हिषोजुहुयात्॥ ॥ततोमहावलिंकुंकुमादिरक्तंरक्तपुष्पा
दियुक्तंसदीपंसदक्षिणांक्षेत्रपालायदद्यात्।तत्रक्षेत्रपालायभूतप्रेतपिशाचराक्षसःशाकि
नीडाकिनीवेतालादिपरिवारयुताय·इमंवलिंसमर्पयामि· भोभोक्षेत्रपालइमंवलिंगृहान·
ममयजमानस्य· आयुःकर्ता· क्षेमकर्त्ता·तुष्टिकर्त्ता· पुष्टिकर्त्ता· शांतिकर्त्ता· वरदोभवः॥इ
मंवलिंशूद्रेण· ब्राह्मणेनवा· चतुष्पथेक्षिपेत्·॥ ॥ततःआचार्यःप्रक्षालितपाणिपादआ
चमेत्·।ततःआचार्यद्वयोब्राह्मणाः प्राङ्मुखा· उदङ्मुखाग्रहवेद्यां· ईशानेस्थापितशांतिक

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लशजलेन मंगलगीतवाद्य पुरःसरं यजमानस्य सपरिवारस्य मंगलाभिषेकं कुर्युः ॥ तत्राभि
षेकमंत्राः पौराणिकाः ॥ ॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा
संकर्षणो विभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवंति विजयाजय ॥ आखंडलोग्निर्भगवान् यमो वै नि
ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणः सहिताः शेषो दिक्पालाः पांतु
ते सदा ॥३॥ कीर्त्तिर्लक्ष्मीधृतिर्मेधा पुष्टिः श्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जावपुःशांतिपुष्टिः कांमातरः
॥४॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च तर्पिताः ॥५॥ देव
दानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥६॥ देवपत्न्यो द्रुमा नागा दे
त्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ॥७॥ औषधानि च रत्नानि का

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लस्यावयवाश्रये॥सरितःसागराःशैलास्तीर्थानिजलदानदाः॥८॥एतेस्त्वामभिषिंचंतुसर्वकामार्थ
 सिद्धये॥ ॥स्वशाखोक्तवैदिकमंत्राश्च॥देवस्यत्वा॥१॥देवस्यत्वा॥२॥देवस्यत्वा॥३॥कोसिकतमोसि
॥४॥शिरोमे ५ जिह्वामे ६ बाहूमे ७ पृष्ठीर्मे ८ नाभिर्मे ९ प्रतिक्षत्रे १० त्रयादेवाः ११ प्रथमाद्विती
यै १२ द्यौःशांति १३ तच्चक्षु १४ स्वस्तिनइन्द्रो १५ विश्वानिदेव १६ यथेमाम् १७॥ ॥ततःस्नाता
र्यादिभिषिक्तोयजमानःअग्नेःपश्चिमभागेप्राङ्मुखोपविष्टोदङ्मुखेभ्यःआचार्यऋत्विग्भ्योदानं
दद्यात्॥ ॥तत्रप्रथमंसूर्यप्रीतयेकपिलागोदानम्॥देवब्राह्मणौत्रिःसंपूज्यदेय।कुशयवं
तिलजलान्यादाय।ॐअद्येत्यादिदेशकालौस्मृत्वा।कृतैतन्नवग्रहयज्ञ·प्रतिष्ठार्थंइमांकपिलां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धेनुं गां रुद्रदेवतां सूर्यप्रीतये अमुगोत्राय अमुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे॥
कपिले सर्वदेवानां पूजनीया सि रोहिणी॥ तीर्थदेवमयी यस्मात् अतः शांतिं प्रयच्छ मे॥ इति मंत्रेण ब्रा
ह्मणहस्ते जलं दद्यात्॥ ब्राह्मणो न स्वस्तीत्युक्त्वा स्वशाखोक्तां कामस्तुतिं पठेत्॥ १॥ ततो नैवेद्यप्र
कारेण देवताभिधानपुरःसरं। सोमाय समुद्रदैवतं शंखं॥ २॥ भौमाय रुद्रदैवतं वृषभं॥ ३॥
बुधाय अग्निदैवतं हिरण्यम्॥ ४॥ जीवाय वस्त्रयुग्मं बृहस्पतिदैवतं॥ ५॥ शुक्राय श्वेताश्वं यम
दैवतं॥ ६॥ शनैश्चराय कृष्णां गां रुद्रदैवतं॥ ७॥ राहवे महाभैरवदैवतां लोहं॥ ८॥ केतुभ्यो अ
ग्निदैवतं छागं॥ ९॥ तत्तन्मंत्रेण दद्यात्॥ मंत्राश्च शंखदानमंत्र॥ पुराणस्त्वं शंख पुराणानां सं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र. शां. गलानां च मंगलं ॥ विष्णुना विधृतो नित्य· मतः शांतिं प्रयच्छ मे ॥ २॥ वृषभदान मंत्र ॥ धर्मस्त्वं वृष
४५ रूपेण जगदानन्दकारकः ॥ अष्टमूर्त्तेरधिष्ठानमतः शांतिं प्रयच्छ मे ॥ ३ ॥ हिरण्यदानमंत्रः ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ ४॥ युग्मपीतव
स्त्रदानमंत्र ॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ॥ प्रदानात्तस्य मे विष्णुरतः शांतिं प्रयच्छ मे ॥
॥ ५॥ अश्वदान मंत्रः ॥ विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः ॥ चन्द्रार्कवाहनं नित्यमतः शांतिं प्रय
च्छ मे ॥ ६ ॥ कृष्णगविदानमंत्रः ॥ यस्मात्त्वं पृथिवी सर्वा धेनो केशवसन्निभे ॥ सर्वपापहरा नित्या अतः
शांतिं· प्रयच्छ मे ॥ ७ ॥ लोहदानमंत्रः ॥ यस्मादुर्गाणि कर्माणि त्वदाधाराणि सर्वदा ॥ हेलो हलांगलादीनि तस्मा राम:
४५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षांतिप्रयच्छमे ॥ ८ ॥ छत्रदानमंत्र ॥ यस्मात्त्वं सर्वयज्ञानां मंगलेन व्यवस्थितं ॥ यानं विभावसोर्दिं
त्यमतः शांतिप्रयच्छमे ॥ ९ ॥ ॥ सर्वास्वदक्षिणासूर्यदक्षिणासमाप्ताज्ञातव्याः । तेन सोमाय
शंखं दत्वा कपिलां गो मूल्यसुवर्णंत्वारव मूल्यन्यूनं तदानीमेव दद्यात् ॥ एवं न्यूनस्थले सर्वत्र
सूर्यदक्षिणासमाकार्या । आदित्यादिनवग्रहेभ्यः स्वर्णभूषिता मेकैकां गां वा समानं सुवर्ण
मेव दक्षिणा दद्यात् ॥ ततः सुवर्णेन समाकार्याः यजमानेन दक्षिणा ॥ सर्वेषामेव गावो वाद
तव्या हेमभूषिताः ॥ सुवर्णमथवा दद्यात् गुरुर्वा येन तुष्यति ॥ स्वस्वमंत्रेणा प्रदातव्याः सर्वाः सर्वत्र द
क्षिणा ॥ ॥ ॐ अद्येत्याद्युक्त्वा नानावेदाध्यायिभ्यो नाना गोत्रेभ्यो नाना शर्मभ्यो दीनानाथेभ्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्पश्च· यथाशक्तिं भूयसीं दक्षिणां दातुमुत्सृजेत् ॥ इति भूरिदक्षिणां दद्यात् ॥ ततो यथाशक्ति पूर्वोक्त
होमसंख्यया ब्राह्मणभोजनं संकल्पयेत् ॥ तत्र वाक्य ॥ ॐ अद्येत्याद्युक्त्वा· कृतस्यनवग्रहशांतिम
खस्य यथावत्फलप्राप्तये नानानामगोत्रान्· नानाशर्मणो नानावेदाध्यायिनो ब्राह्मणान्·य
थोपपन्नेन आत्मान्नेन तोषयिष्ये· इति· ॥ ततो होता ॥ ॐ अद्येत्यादि कृतस्यनवग्रहशांतिमखस्य
परिपूर्णतासिद्ध्यर्थं पूर्णाहुतिं होमयिष्ये इति संकल्प्य· । घृतपूर्णस्रुवे नारिकेलादिफलं चंद
नवस्त्रं निधाय यजमानान्वारब्धः पूर्णाहुतिं जुहुयात् ॥ तत्र मंत्रः ॥ ॐ समुद्रादूर्मिः ॥१॥ वयं(
नाम ॥२॥ चत्वारि शृंगाः ॥३॥ मूर्द्धानं दिवः ॥४॥ ॐ पुनस्त्वा ॥५॥ ॐ पूर्णा दर्वि ॥६॥ ॐ सप्तते ॥७॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ धामंते॥ ८ ॥ इति सर्वपाठांते स्वाहाकारेणाग्नौ क्षिपेत्॥ पूर्णाहुतिमुत्तमां जुहोतीति ब्राह्मणा ब्रूयुः
॥ ततो होमानां वह्निं पुष्पचंदनादिना संपूज्य स्रुक्‌वेणा किंचिद्भस्म आनीय आयुषं कुर्यात्॥ आयुषं ज
मदग्ने इति ललाटे। कश्यपस्य आयुषमिति ग्रीवायां· यद्देवेषु आयुषमिति दक्षिणबाहुमूले· त
न्नो अस्तु आयुषमिति हृदि तिलकं कुर्यात्॥ ततो यजमानस्य· पुनः पुण्याहवाचनं कृत्वा· गंध
पुष्पादिभिः पंचोपचारैरावाहितदेवताप्रत्येकं यु[प]दापूजयित्वा प्रणामेत्॥ ततो यजमानो गुरुर्वा· ॐ उ
त्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे॥ उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा॥ ॐ यांतु देवगणा
ः सर्वे पूजामादाय पार्थिवीम्॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च॥ इति पठित्वा अक्षतं प्रक्षेपेत्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्र·शा पीठस्तांविसर्जयेत्॥ततोयजमानस्ताम्रपात्रस्थंघृतंन्निरीक्ष्यब्राह्मणायदद्यात्·।तत्राज्यनिरीक्षणे
४७ मंत्राः॥ॐअलक्ष्मीर्यन्मदौस्थ्यंमेसर्वगात्रेष्ववस्थितं॥तत्सर्वंशमयाज्यत्वंलक्ष्मींपुष्टिंप्रवर्द्धय॥इ
तिनिरीक्ष्य·आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंशुभं॥आज्येनदेवास्तृप्यंतिआज्येलोकाःप्रतिष्ठिताः
॥भौमान्तरिक्षदिव्यंवयन्मेकिल्बिषमागतं॥सर्वंतदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु।इतिसंस्पृश्य
दद्यात्॥ततोयजमानःतंडुलाद्युपकरणं·आचार्यायप्रतिपादयामीतिप्रणिपत्तिरूपंदानंकुर्यात्॥
ततः।प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुय॥स्मरणादेवतद्विष्णोःसम्पूर्णंस्यादितिश्रुतिः·इत्युक्त्वा·
ॐविष्णुरितित्रिवारत्रयंस्मृत्वाञ्जलिंबध्वा·ब्राह्मणान्प्रार्थयेत्॥मयायत्कृतंग्रहहोमादिरूपंकर्मतत्सू रामः ४७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नातिरिक्तं युष्मद्वचनात्परिपूर्णमस्तुइति· तेच परिपूर्णमस्तुइतिब्रूयुः॥ततोब्राह्मणमंत्रोशिषोगृहीता:
तान्· सानुनयंविसृज्य· सुहृन्मित्रादियुतः सोत्साहोभुंजीतः॥ ॥इतिसंक्षेपतोग्रहशांतिविधिः समा
प्तम्॥ ॥शुभंभूयात्॥ ॥श्रीशाके१७८६ फाल्गुनवदि ९ सोमवासरे· लिखितमिदम्पुस्तकं· श्री
विबुधराजद्विज·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi